SHĀHARĀJA GUṆĀNUVARṆANAM

Shāhji, the * Scholar prince and Maratha ruler of Tanjore, needs no introduction. There can hardly be anyone with any pretentions to the knowledge of South Indian Modern History, who would not be familiar with the munificence

---

* The following works are known to have been written by Shāhji. His Marathi works are not listed here.

1.	Śabdaratnasamanvaya	Sanskrit
2.	Śṛṅgāramañjarī	,,
3.	Aṣṭapadi	,,
4.	Kirātavilāsa	Telugu
5.	Kṛṣnaleelāvilāsa	,,
6.	Gangāpārvatīsamvāda	,,
7.	Jalakrīdā	,,
8.	Tyāgarājavinōdachitraprabandha	,,
9.	Draupadīkalyānam	,,
10.	Pañcharatnaprabandhamu	,,
11.	Pārvatīparinayamu	,,
12.	Ratīkalyānam	,,
13.	Rāmapaṭṭābhiṣēka	,,
14.	Rukmaṇīsatyabhāmāsamvādam	,,
15.	Vallīkalyānam	,,
16.	Vignēśwarakalyānam	,,
17.	Viṣṇupallakisēvāprabandham	,,
18.	Śaṅkarapallakisēvāprabandham	,,
19.	Sacīpurandaram	,,
20.	Śānthākalyānam	,,
21.	Satīdānaśūram	,,
22.	Satipatidānavilāsam	,,
23.	Sarasvatīkalyānam	,,
24.	Sītākalyānam	,,
	Saṅgeetham	,,
25.	Thyāgēśapadam	,,
26.	Do	,,
27.	Rāgalakṣanam	,,
28.	Bhaktavatsalavilāsanāṭakam	,,
29.	Rādhā Vamśīdharavilāsanāṭakam	Hindi
30.	Viśwātītavilāsanāṭakam	,,

and scholarship of Shāhji. He was hailed as the *Bhōja of Tamil Land* and richly deserved the title. A band ol distinquished pandits adorned his court and enriched Sanskrit and Telugu literature during his time. More than a hundred works were written by this band of scholars on a variety of subjects. Pandits patronised by Shāji were more than 45, some well-versed in one branch of literature, and some masters of several branches.

To know more about Shāji, his time and works, the band of Pandits whom Shāji patronised by assigning tax-free lands and an entire village Shājirājapuram and their works, the reader would do well to go through the informing introduction to Śāharāja Vilās written by Dr. V. Rāghavan of the Madras University.

The work proposed to be published cannot claim to have many of the merits of a first rate poetry, nor can it claim to have thrown light on new historical events, the only merit it can boast of being that it has not found a place in the catalogues of Sarasvatī Mahāl so far published. That this work of 58 verses in different metres puts in a nutshell practically all the historical events that could be found scattered in the 8 cantoes of *Sahrāja Vilāsa*, singles out this from other contemporary productions on the same subject.

This is contained in a paper manuscript consisting of nearly 200 pages bearing the No. 13938 which is bundled in 'Amānat' (16, miscellaneous collection). The first part of the manuscript forms part of *Sāmrājyalukṣmipīthika*, which has been published by Sarasvatī Mahāl. The second part is *Shāharājaguṇānuvarṇanam* by an unknown author. It might be that it was written by one of the Court Poets of Shāhji. There are stray verses of reputed Pandits of Shāhji's time written on the flysheets of more than one manuscript. The present work is neither a postscript nor appendix to some other work. This is an independent one and complete in itself. So it is thought worthwhile publishing it in the Sarasvatī Mahāl Library Journal. Verse No. 33 of this work throws light on the fact that the country between Madura and Pāmpan was ruled by Marava king. Verse No. 47 refers to one Julukhan, who was instigated by the Pāndya king and giving trouble to Sēthunātha. Pāndya king did not directly attack Sēthunātha as described in Shāharājavilāsa by Srīdharavenkatēsa.

P. V. Varadaraja Sarma, M. A.,
Librarian,
T. M. S. S. M. Library, Tanjore.

Tanjore,
12—2—'59.

श्रीगणेशाय नमः

शाहराजगुणानुवर्णनम्

श्रीमद्भोसलमूर्धन्यभूपालकशिरोमणेः ।
शहजीन्द्रस्य दीपांबानन्दनस्य गुणान् ब्रुवे ॥ १ ॥

अतस्तदीयसंशुद्धवंशपारम्परीक्रमम् ।
यथापरिज्ञातमहं वर्णयामि निबोध्यताम् ॥ २ ॥

स्वस्ति श्रीकरभोसलान्वयसुधासिन्धावभूच्चन्द्रव-
न्मालोजक्षितिपालकः प्रथमतः संग्राहको यः सताम् ।
आचन्द्रार्कमनुव्रतां च महतीं सन्तानपारम्परी-
मेव स्वं वरमाप मुख्यमनघं शंभोर्महादेवतः ॥ ३ ॥

ततो महाराष्ट्रविवर्धनोऽभूत्पाता रथेभाश्वभटैः समृद्धः ।
मन्त्रिप्रधानाप्तकुलीनबन्धुः संरक्षकः श्रीशहजिक्षितीन्द्रः ॥

तुलुष्कसेनाब्धिनिवारकत्वात्कर्णाटकस्थापनभूरिकीर्तिः ।
चतुस्समुद्रान्तनृपालवंशैः संश्लाघितोऽभूत्सहजिक्षितीन्द्रः ॥ ५ ॥

स राजसिंहः शहजिक्षितीन्द्रः कीर्तिप्रतापाद्यमितौजसैव ।
अनन्यलभ्यान्मकराङ्कपूर्वान् प्राप स्म नानाबिरुदप्रकारान् ॥ ६ ॥

दाक्षिण्यपुण्यवैभवदानदयाधर्मनीतिजन्मभुवम् ।
भोसलशहजीन्द्रं तं प्राप महाराजनाम तत्प्रथमम् ॥ ७ ॥

तस्मान्महाराजशहक्षितीन्द्रादेकोजिराजस्तनुजो बभूव ।
औदार्यगांभीर्यविवेकधैर्यसौन्दर्यशौर्यादिगुणैकधुर्यः ॥ ८ ॥

दिने दिनेऽसौ नवशुक्लपक्षसुधांशुवत्प्राप्य कलाभिवृद्धिम् ।
तमांसि भित्त्वा मृदुभिः करौघैर्मनोहरोऽभूज्जनरञ्जनेन ॥ ९ ॥

सौजन्यं जनतानुतापहरणं सौन्दर्यमन्यादृशं
गांभीर्यं कुतुकं रमाविलसनं धैर्यं च शौर्यं यशः ।
मर्यादामहिमा कलाचतुरिमा मानश्च तद्रक्षणं
सर्वं प्राप ततश्च यौवनमपि प्रेम्णैकराजप्रभुम् ॥ १० ॥

गांभीर्ये जलधिर्धृतौ सुरगिरिर्मेधाविशेषे गुरुः
सौन्दर्ये मदनः प्रसङ्गफणितौ शेषः क्षमायां मही ।
दाने कल्पतरुर्नये मनुविभुः शौर्ये किरीटीति च
ख्यातिं प्राप गुणैः शुभैर्भुवि महाराजस्स एकोजिराट् ॥ ११ ॥

तदा चन्द्रान्वये जाता तिम्मोजिनृपतेः सुता ।
प्रभावत्यां दीपमांबा साक्षाल्लक्ष्मीरिव स्वयम् ॥ १२ ॥

माता प्रभावती नाम तत्पुत्री दीपमाम्बिका ।
रत्नगर्भा च रत्नं च सादृश्यायात्र कल्पते ॥ १३ ॥

ताभिंगलक्ष्मीरसुधांबुधिश्रियं जनैर्विदित्वा वर एकराजः ।
मुदोपयेमे किल दीपमांबिकां स्वतः श्रितां भोसलभाग्यदेवताम् ॥ १४ ॥

नित्यं च या भाति दयाविशेषभूरिप्रतिष्ठापितसक्तुकुम्भा ।
सा दीपमांबा सनयावलम्बा यशोम्बबिम्बायतसत्कदम्बा ॥ १५ ॥

गौरी यथा चन्द्रकलावतंसं लक्ष्मीर्यथा शार्ङ्गशरासनाङ्कम् ।
वाणी यथा विश्वसृजं तथैव दीपाम्बिकाऽऽह्लादयदेकराजम् ॥ १६ ॥

ततोऽचिरेणैव शुभे मुहूर्ते तयोः पुराजन्मतपःप्रभावैः ।
जातः कुमारः शहजीन्द्रनामा दिलीपरामादिसमानधामा ॥ १७ ॥

तदीयजन्मोत्सवपुण्यवेलामहामहत्त्वेन तयोस्तदापि ।
आरोग्यभाग्यधनधान्ययशःप्रतापसाम्राज्यराज्याद्यभिवृद्धिरासीत् ॥ १८ ॥
(इयं उपजातिः)

तस्यानुजः श्रीशरभोजिनामा दीपाम्बिकायास्तनुजः प्रतीतः ।
हेमापगासीमभवेन येन सुरापगाभूर्विजितः कुमारः ॥ १९ ॥

तदीयजन्मयोगेन पितुरेकोजिभूपतेः ।
महानतिशयो जातः श्रूयतां परिकीर्त्यते ॥ २० ॥

साम्ना दानेन भेदादपि रणकलया द्राग्वशीकृत्य सर्वान्
श्रीदेवमाद्यगादिस्थितिकृतिमनिमानेकराजक्षितीन्द्रः ।
कावेरीवारिपूरप्रबलितफलवद्व्रीहिसस्यादिपूर्णं
स्वीचक्रे चोलदेशं रथगजहययोधादिसान्द्रप्रतापः ॥ २१ ॥

ततस्तृतीयं तनुजं गुणाढ्यं प्रासूत रम्येऽहनि दीपमाम्बा ।
तुक्कोजिराजेन्द्र इति प्रसिद्धं प्रसिद्धमन्त्रं श्रुतिवागिवाग्र्या ॥ २२ ॥

तदेकोजिमहाराजदेवी श्रीदीपमाम्बिका ।
पुत्रैस्त्रिभिर्विरुरुचे परा शक्तिर्यथाऽऽगमैः ॥ २३ ॥

सर्वे कुमाराः क्रमतोऽभिवृद्धाः सर्वे च वीर्यादिनयेन बद्धाः ।
सर्वे दयाधर्मविवेकपूर्णाः सर्वे प्रजारञ्जनलब्धवर्णाः ॥ २४ ॥

तत्रापि तेषां प्रथमः सुमेधाः सङ्गीतसाहित्यकलाविनोदी ।
नयेन दानेन च वैभवेन जयेन शीलेन च निस्तुलोऽभूत् ॥ २५ ॥

अखण्डभूमण्डलपालनार्हः साम्राज्यवान् श्रीशहजिक्षितीन्द्रः ।
अनन्यसाधारणकेवलैकलसन्महाराजपदाङ्कितोऽभूत् ॥ २६ ॥

एकैकस्मिन्नपि वा भवति निरूढात्मको न कश्चिदपि ।
शहजिमहाराजो यदि सकलकलावल्लभत्वबिरुदाङ्कः ॥ २७ ॥

हस्तिस्कन्धे तुरङ्गेऽप्यथ महति रथे कार्मुके सायके वा
खड्गे कुन्तादिशस्त्रे समितिवितरणे चैवमन्तस्सभायाम् ।
शास्त्रे भाषासु युक्तौ व्रतविधिषु तथा साहितीगानयोर्वा
सर्वत्रातीव दक्षः सहजनरपतिर्दीपमाम्बाकुमारः ॥ २८ ॥

तस्य श्रीसहजीन्द्रस्य स्थिरभक्ति ममौ मनः ।
त्यागराजस्वामिपदे चञ्चरीक इवांबुजे ॥ २९ ॥

अस्मृत्वा चन्द्रमौलेः श्रुतिशिरसि नुतं पावनं पादपद्मं
मातृश्रीदीपमांबाचरणसरसिजं तत्कदा वाऽप्यनत्वा ।
नो भुङ्क्ते नैव शेते न च विहरति हा नैव दत्ते सभायां
नागच्छत्यन्तरास्ते न च वदति न वाऽलङ्करोति स्वयं सः ॥ ३० ॥

किमन्यैर्बहुभिर्वाक्यैरासेतुहिमभूधरम् ।
यः कश्चिदपि तं वीक्ष्य स्वकस्तुं नोत्सहते पुनः ॥ ३१ ॥

तं मदनमिति युवत्यः कल्पकमिति याचकाः परे रुद्रम् ।
इति शाहजिमहाराजं प्राहुस्सौन्दर्यदानविक्रमतः ॥ ३२ ॥

[1] नागापगान्तमरपप्रभुभूमिभागमाक्रम्य शांतसुधिया कृतसंविभागः ।
रामेश्वरेप्यथ तुलापुरुषादिदानं कल्पं च येन गुरुपुण्यकलाविधानम् ॥ ३३ ॥

[2] अनेकाग्रहारादिधर्मप्रतिष्ठां, विधायांजसाहोरात्रमाराधयित्वा ।
स धन्योऽभवत्कीर्तितेजोजनन्याः, कृपापात्रतामेत्य नित्यं जनन्याः ॥ ३४ ॥

---

(1) See introductory verses of Dhundiraja.

दिल्लीशोपद्रवेण स्वपदविचलितो यः शिवोजेस्तनूजो
राजारामः स येन स्वपुरमुपगतो रक्षितस्तत्क्षणेन ।
भाग्यैरिन्द्रोपभोग्यैः पुनरपि महति स्थापितः स्वाधिराज्ये
भ्रातृस्नेहे रघूणां पतिरपि न समो यस्य शुद्धाशयस्य ॥

रक्षित्वा सेतुनाथं शरणमुपगतं पाण्ड्यराजात्तगन्धं
दीपाम्बाहस्ततोऽपि व्यरचयत तुलादीनि दानानि सेतौ ।
यत्तीरे सह्यजाया निरुपधिधरणीभूषणैः सर्वमान्या-
न्विद्वद्रत्नैः प्रयत्नाद्दिशि दिशि विदितैरग्रहारानतानीत ॥

(2) Shājarājavilāsa Cantos 8-28-33.

ब्रुवत्यमुष्मिन्निति सेतुनेता पुरो धरित्रीतलवासवस्य ।
अदृश्यतोदग्रचमूसमग्रस्तरङ्गितोत्तुङ्गतरोपहारः ॥

निवेदितो वेत्रिवरेण सेतुनेतोपयातो नृपतेः पदाब्जे ।
अवन्दतानिन्दितरत्नहेमपुष्पोपक्लृप्तार्हणमुत्प्रहर्षः ॥

[3] तमेवं गुणाढ्यं यशःकीर्तितेजोनिधी रामराजोऽपि भेजे शरण्यम् ।
तथा तेन वन्द्यं जनैराभिनन्द्यं किमन्येन वेति क्षणं वा न मन्ये ॥ ३५ ॥

विप्राणामाश्रितानामुपनयनविवाहोल्लसद्वाजपेया-
प्तोर्यामादिनिष्ठां सपदि विरचयन् धर्ममेव प्रपन्नः ।
भृत्यानां वेतनादीन्युचितमतिदिशन् सर्वथा शंभुसेवां
मातुः श्रीपादसेवामपि हृदि शरणं भावयामास नित्यम् ॥ ३६ ॥

अनृतं न वदति वितरत्याश्रितं स्वजनं रक्षति हन्ति रिपुम् ।
जयति कलाभिर्विलसति विभवैः न वहति गर्वं भजति शिवम् ॥ ३७ ॥

सहजिमहीपतिरेव महान् भुवि सन्तु परश्शतमितरनृपाः ।
तत्सदृशस्तु न भूतो न भवति भूतो भविष्यति वा ॥ ३८ ॥

किमिन्द्रः किं चन्द्रः किमनघ उपेन्द्रस्त्रिपुरभित्
किमोजः किं भोजः किमु जनकराजः शरभवः ।
किमार्यः किं सौर्यः किमु निषधवर्यः प्रभुरसा-
विति ब्रूते लोकः शहजिनृपतिं सद्गुणानिधिम् ॥ ३९ ॥

श्रीदीपमाम्बागर्भाब्धिपूर्ण (न्दोः) शहजिप्रभोः ।
ललितेनैव वचसा विश्वं वश्यं भवत्यहो ॥ ४० ॥

यन्माधुर्यं सुधायां यदपि मणिमये धाम्नि विश्वप्रसिद्धं
यन्माध्वीके च नित्यं लसति यदपि मृद्वीकगुच्छेऽतिपक्वे ।

अहं मदीयास्तनयाश्च दारा मन्त्रिव्रजा भूमिरियं च राजन् ।
लब्धात्मकं त्वत्कृपया हि सर्वं पश्यन् भवान् नन्दतु शास्तु चेदम् ॥

(3) Shājarājavilāsa Cantos 7-3-4.

सेतुनेतुरधुना विपत्तिराकर्णितैव यवनेन्द्रयूथपाः ।
राजरामविषये वितन्वते विप्लवं तदुभयं सुदुस्सहम् ॥

डिल्यधीशबलनिग्रहस्ततः कार्य एव स च सेतुनायकः ।
संश्रितो ननु चिराद्भयास्पदं तत्पुरः किमिह सम्प्रधार्यताम् ॥

यद्गांभीर्यं पयोब्धौ फणिधरमृदुशय्यावदातेऽप्यजस्रं
तत्सर्वं दीपमाम्बाशहजिनृपवचःसंततौ लालगीति ॥ ४१ ॥

विरसविकृतबद्धानेकप्रबन्धसहस्रतो-
प्युचितमनघव्यङ्ग्यं वाक्यं तदर्धमथाप्यलम् ।
शहजिनृपतिस्त्वीदृग्वाक्यप्रपंचमयानहो
सृजति निमिषे संख्यातीतान् शिवार्हपदव्रजान् ॥ ४२ ॥

मेधाविशेषः कीदृग्वा न जाने तस्य भूपतेः ।
बहुष्वपि च कार्येषु जागर्त्येकवदेव सः ॥ ४३ ॥

ध्यायन् शङ्करमुच्चरन् मनुजपं पश्यन् पुरो नाटकं
शृण्वन् कार्यमुदीरयंस्तदुचितं संभावयन्सत्कवीन् ।
एकान्तं कलयन् जनांश्च विमृशन् भृत्योत्तरं सन्दिशन्
शाहेन्द्रः कवितां तनोति ललितां लोकैकसंभाविताम् ॥ ४४ ॥

अश्वान्नागान्रथौघान् भटनिकरमिषून् खड्गकुन्तादिशस्त्रा-
ण्युष्ट्रान्धेनूर्महोक्षाननुपमशिबिकाभूषणान्यंशुकानि ।
प्रासादान् दासवर्गान् कविबुधगणकान् गायकान्नन्नहेम-
च्छत्रादींश्चातिचक्रे शहजिमहिपतिः कोटिकोटीगणेयम् ॥ ४५ ॥

क्ष्मारेणवोऽपि गण्याः स्युस्तथाऽऽकाशे च तारकाः ।
अगण्यास्सहजीन्द्रस्य धैर्यशौर्यादयो गुणाः ॥ ४६ ॥

पाण्ड्येशमन्त्रिनरसाधिपयाचभूप-
प्रोत्साहनादतिकठोरतयाभियान्तम् ।
तंजूल्युखानयवनाधिपमाशु चक्रे
भीतं हितं च महिमज्ञमथापयान्तम् ॥ ४७ ॥

चन्द्रेण कैरवाणीव कमलानीव भानुना ।
शहजीन्द्रेण तेनैव रज्यन्ते सकला जनाः ॥ ४८ ॥

सप्तविभक्तिपद्यमिदम्

शंभोर्यः शरणीकरोति भजनं क्ष्मापा मुदा यान्ति यं
लक्ष्मीर्येन समृद्ध्यते रिपुनृगा यस्मै नमस्यन्त्यलम् ।
सत्कार्यं प्रवरीवृतीति च यतो यस्य प्रथा जृंभते
यस्मिन्राजति धीरता सहजिराट् सोऽयं जनैः श्लाघ्यते ॥ ४९ ॥

एवं जेगीयते सर्वैर्जनैः सुगुणलोलुपैः ।
महान् शहजिराजेन्द्रः सर्वविद्याधुरन्धरः ॥ ५० ॥

ततो महादेवपदाब्जसेवाफलानुभोगैकविलासवन्तम् ।
देवाश्च सर्वे शहजक्षितीन्द्रं दिदृक्षवो वानिमिषा बभूवुः ॥ ५१ ॥

ततः स्वयं शरीभजीमहामहीपतिः क्ष्मा-
प्रखण्डमण्डलाधिपत्यवैभवप्रभाववान् ।
चतुःसमुद्रमुद्रितावनीजनप्रशंसित-
प्रतापकीर्तिचातुरीविजृंभणैर्विराजते ॥ ५२ ॥

तुकोजिराजेन सहानुजेन शरीभराट् पालयते धरित्रीम् ।
तुकोजिराजस्य शिवप्रसादाज्जाताः कुमारा बहवः कुलाढ्याः ॥ ५३ ॥

ताभ्यां सुताभ्यां पौत्रैश्च वन्दिता दीपमाम्बिका ।
व्रतादिनियमान् धत्ते लोकमातेव पार्वती ॥ ५४ ॥

या शैवालयसत्रमण्टपतटाकारामशालाप्रहा-
रादीन्कारयतीहते स्मृतिपुराणेष्वेतिहासेश्च या ।
या लोकोत्तरशान्तिदान्तिनिधिरित्यार्यैः सदा गण्यते
सेयं भोसलवंशभाग्यमहिमा दीपाम्बिका राजते ॥ ५५ ॥

भूदेवी क्षमया कृपाविलसनैर्लक्ष्मीर्गिरा शारदा
गौरी भूरितपोमहत्त्वकलया साक्षात्त्रयी तत्त्वतः ।
आदिल्लीश्वरमा च सेतुपतिभूपालैस्सदा सेविता
दीपाम्बा भुवि भाति भोसलकुलालङ्कारचूडामणिः ॥ ५६ ॥

आयुरारोग्यसौभाग्यभाग्यवंशाभिवृद्धयः ।
दीपाम्बापुत्रपौत्राणां भवन्तु महदाशिषा ॥ ५७ ॥

पुत्रपौत्रादिभिर्नित्यं बन्धुजालैश्च वन्दिता ।
धर्माभिवृद्ध्यै दीपाम्बा जीयादाचन्द्रतारकम् ॥ ५८ ॥

॥ श्रीरस्तु ॥